# Rashtrodbodhanam

# રાષ્ટ્રોદ્બોધનમ્

## Document Information

Text title : Rashtrodbodhanam

File name : rAShTrodbodhanam.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# રાષ્ટ્રોદ્બોધનમ્

(ઉપજાતિવૃત્તમ્)
પ્રવર્તિતં સાધુ પ્રશાસનેન
    યદ્ યોજનાઽઽયોજનમત્ર હૃદ્યમ્ ।
સર્વસ્ય સાહાય્યમપેક્ષતે તદ્
    હૃદા પ્રયોજ્ય સુખ શાન્તિ-હેતોઃ ॥

રાષ્ટ્રસ્ય વૃદ્ધ્યૈ જનતા-સમૃદ્ધ્યૈઃ
    પ્રવર્તિતં યોજન-સૂક્ષ્મ-જાલમ્ ।
દેશઃ શ્રિયા શ્લિષ્યતુ યેન સદ્યો
    દીનાર્ત-લોકોદ્ધૃતિ-રક્ષણં સ્યાત્ ॥

ઉદ્યોગમાસ્થાય વિકાસ કાર્યે
    ઔદ્યોગિકે વા કૃષિ-કાર્ય-જાતે ।
તન્ત્રાશ્રિતે યત્ન-સમાશ્રિતે ચ
    સર્વાત્મના સાધુ પ્રયત્યમેવ ॥

દેશસ્ય રક્ષામધિશ્રિત્ય સદ્ય
    સ્યાજ્જાગરૂકત્વમજસ્રમેવ ।
વિરોધિ શક્તેર્દલનેન નિત્યં
    સ્વપૌરુષસ્યાભિનવા વિવૃદ્ધિઃ ॥

બલં નિધીયેત વિકાસ-કાર્યે
    સમાજ-કલ્યાણ-પરમ્પરાસુ ।
સ્યાદેકતા સૌખ્યકરી જનેષુ
    વિભેદલેશો ન ભુવઃ સ્પૃશેચ્ચ ॥

ભાષાશ્રિતં પ્રાન્ત-સમુત્થિતો વા
    ધર્માશ્રયો જાતિ વિવર્ગ-નિષ્ઠઃ ।
યઃ કોઽપિ ભેદો ન સ વૃદ્ધિમેયાત્

સર્વે વયં ભારત-ભૂ-સુપુત્રાઃ ॥

રાષ્ટ્રસ્ય વૃદ્ધ્યૈ નિતરામપેક્ષ્ય
શ્રમં કઠોરો મનુજૈઃ સમસ્તૈઃ ।
નિર્માણમૂલા પ્રહિતા સુદૃષ્ટિઃ
સ્યાત્ સર્વકાર્યેષુ મનોબલાઢ્યા ॥

દેશે વિદેશે યદિ વા કુચક્રં
સ્વાતન્ત્ર્ય નાશાય પ્રવર્તિતં સ્યાત્ ।
ધ્વસ્ય પ્રમથ્યં ચ તદાયસેન ।
કરેણ સર્વૈર્દૃઢ નિશ્ચયેન ॥

આચારહીનત્વમુપેક્ષણં ચ
ભ્રષ્ટાઽઽશ્રયાઽચાર પરમ્પરા વા ।
અનૈતિકત્વં પરશોષણં ચ
સર્વં સમાપ્ય નિજરાષ્ટ્ર-વૃદ્ધ્યૈઃ ॥

શાન્ત્યૈઃ પ્રગત્યૈઃ અવમત્ય ભેદાન્
લોકા સમે સઙ્ઘટિતા ભવેયુઃ ।
ચારિત્રિકી પ્રાપ્ય સમુન્નતિં ચ
સર્વાપરાધાપનયં ક્રિયેત ॥

Proofread by Mandar Mali

*Rashtrodbodhanam*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*